# Vyapohana Stotram

सूत उवाच

व्यपोहनस्तवं वक्ष्ये सर्वसिद्धिप्रदं शुभम् ।

नन्दिनश्च मुखात् श्रुत्वा कुमारेण महात्मना ।

व्यासाय कथितं तस्मात् बहुमानेन वै मया ॥

ॐ नमः शिवाय नमः

ॐ नमः शिवाय शुद्धाय निर्मलाय यशस्विने ।

दुष्टान्तकाय सर्वाय ( शर्वाय ) भवाय परमात्मने ॥

पञ्चवक्त्रो दशभुजो ह्यक्षपञ्चदशैर्युतः ।

शुद्धस्फटिकसङ्काशः सर्वाभरणभूषितः ॥

सर्वज्ञः सर्वगः शान्तः सर्वोपरि सुसंस्थितः ।

पद्मासनस्थः सोमेशः पापमाशु व्यपोहतु ॥

ईशानः पुरुषश्चैव अघोरः सद्य एव च ।

वामदेवश्च भगवान् पापमाशु व्यपोहतु ॥

अनन्तः सर्वविद्येशः सर्वज्ञः सर्वदः प्रभुः ।

शिवध्यानैकसंपन्नः स मे पापं व्यपोहतु ॥

सूक्ष्मः सुरासुरेशानो विश्वेशो गणपूजितः ।

शिवध्यानैकसंपन्नः स मे पापं व्यपोहतु ॥

शिवोत्तमो महापूज्यः शिवध्यानपरायणः ।
सर्वगः सर्वदः शान्तः स मे पापं व्यपोहतु ॥
एकाक्षो भगवानीशः शिवार्चनपरायणः ।
शिवध्यानैकसंपन्नः स मे पापं व्यपोहतु ॥
त्रिमूर्तिर्भगवानीशः शिवभक्तिप्रबोधकः ।
शिवध्यानैकसंपन्नः स मे पापं व्यपोहतु ॥
श्रीकण्ठः श्रीपतिः श्रीमान् शिवध्यानरतः सदा ।
शिवार्चनरतः साक्षात् स मे पापं व्यपोहतु ॥
शिखण्डी भगवान् शान्तः शवभस्मानुलेपनः ।
शिवार्चनरतः श्रीमान् स मे पापं व्यपोहतु ॥

त्रैलोक्यनमिता देवी सोल्काकारा पुरातनी ।
दाक्षायणी महादेवी गौरी हैमवती शुभा ॥
एकपर्णाग्रजा सौम्या तथा वै चैकपाटला ।
अपर्णा वरदा देवी वरदानैकतत्परा ॥
उमासुरहरा साक्षात्कौशिकी वा कपर्दिनी ।
खट्वाङ्गधारिणी दिव्या कराग्रतरुपल्लवा ॥
नैगमेयादिभिर्दिव्यैश्चतुर्भिः पुत्रकैर्वृता ।
मेनाया नन्दिनी देवी वारिजा वारिजेक्षणा ॥
अम्बा या वीतशोकस्य नन्दिनश्च महात्मनः ।
शुभावत्याः सखी शान्ता पञ्चचूडा वरप्रदा ॥

सृष्ट्यर्थं सर्वभूतानां प्रकृतित्वं गताव्यया ।
त्रयोविंशतिभिस्तत्त्वैर्महदाद्यैर्विजृम्भिता ॥
लक्ष्म्यादि शक्तिभिर्नित्यं नमिता नन्दनन्दिनी ।
मनोन्मनी महादेवी मायावी मण्डनप्रिया ॥
मायया या जगत्सर्वं ब्रह्माद्यं सचराचरम् ।
क्षोभिणी मोहिनी नित्यं योगिनां हृदि संस्थिता ॥
एकानेकस्थिता लोके इन्दीवरनिभेक्षणा ।
भक्त्या परमया नित्यं सर्वदेवैरभिष्टुता ॥
गणेन्द्राम्भोजगर्भेन्द्रयमवित्तेशपूर्वकैः ।
संस्तुता जननी तेषां सर्वोपद्रवनाशिनी ॥
भक्तानामार्तिहा भव्या भवभावविनाशिनी ।
भुक्तिमुक्तिप्रदा दिव्या भक्तानामप्रयत्नतः ।
सा मे साक्षान्महादेवी पापमाशु व्यपोहतु ॥

चण्डः सर्वगणेशानो मुखाच्छम्भोर्विनिर्गतः ।
शिवार्चनरतः श्रीमान् स मे पापं व्यपोहतु ॥

शालङ्कायनपुत्रस्तु हलमार्गोत्थितः प्रभुः ।
जामाता मरुतां देवः सर्वभूतमहेश्वरः ॥
सर्वगः सर्वदृक् शर्वः सर्वेशसदृशः प्रभुः ।
सनारायणकैर्देवैः सेन्द्रचन्द्रदिवाकरैः ।
सिद्धैश्च यक्षगन्धर्वैर्भूतैर्भूतविधायकैः ॥

उरगैः ऋषिभिश्चैव ब्रह्मणा च महात्मना।
स्तुतस्त्रैलोक्यनाथस्तु मुनिरन्तःपुरं स्थितः।
सर्वदा पूजितः सर्वैर्नन्दी पापं व्यपोहतु॥
महाकायो महातेजा महादेव इवापरः।
शिवार्चनरतः श्रीमान् स मे पापं व्यपोहतु॥

मेरुमन्दारकैलासतटकूटप्रभेदनः।
ऐरावतादिभिर्दिव्यैर्दिग्गजैश्च सुपूजितः॥
सप्तपातालपादश्च सप्तद्वीपोरुजङ्घकः।
सप्तार्णवाङ्कुशश्चैव सर्वतीर्थोदरः शिवः॥
आकाशदेहो दिग्बाहुः सोमसूर्याग्निलोचनः।
हतासुरमहावृक्षो ब्रह्मविद्यामहोत्कटः॥
ब्रह्माद्याधोरणैर्दिव्यैर्योगपाशसमन्वितैः।
बद्धो हृत्पुण्डरीकाख्ये स्तम्भे वृत्तिं निरुध्य च॥
नागेन्द्रवक्त्रो यः साक्षात् गणकोटिशतैर्वृतः।
शिवध्यानैकसंपन्नः स मे पापं व्यपोहतु॥

भृङ्गीशः पिङ्गलाक्षोऽसौ भसिताशस्तु देहयुक्।
शिवार्चनरतः श्रीमान् स मे पापं व्यपोहतु॥

चतुर्भिस्तनुभिर्नित्यं सर्वासुरनिबर्हणः।
स्कन्दः शक्तिधरः शान्तः सेनानी शिखिवाहनः।
देवसेनापतिः श्रीमान् स मे पापं व्यपोहतु॥

भवः शर्वस्तथेशानो रुद्रः पशुपतिस्तथा।
उग्रो भीमो महादेवः शिवार्चनरताः सदा।
एताः पापं व्यपोहन्तु मूर्तयः परमेष्ठिनः॥

महादेवः शिवो रुद्रः शङ्करो नीललोहितः।
ईशानो विजयो भीमो देवदेवो भवोद्भवः॥
कपालीशश्च विज्ञेयो रुद्रा रुद्रांशसम्भवाः।
शिवप्रणामसंपन्ना व्यपोहन्तु मलं मम॥

विकर्तनो विवस्वांश्च मार्ताण्डो भास्करो रविः।
लोकप्रकाशकश्चैव लोकसाक्षी त्रिविक्रमः॥
आदित्यश्च तथा सूर्यश्चांशुमांश्च दिवाकरः।
एते वै द्वादशादित्या व्यपोहन्तु मलं मम॥

गगनं स्पर्शनं तेजो रसश्च पृथिवी तथा।
चन्द्रः सूर्यस्तथात्मा च तनवः शिवभाषिताः॥
पापं मम व्यपोहन्तु भयं निर्नाशयन्तु मे॥

वासवः पावकश्चैव यमो निर्ऋतिरेव च।
वरुणो वायुसोमौ च ईशानो भगवान् हरिः॥

पितामहश्च भगवान् शिवध्यानपरायणः।
एते पापं व्यपोहन्तु मनसा कर्मणा कृतम्॥

नभस्वान् स्पर्शनो वायुरनिलो मारुतस्तथा।
प्राणः प्राणेशजीवेशौ मारुतश्शिवभाषिताः।
शिवार्चनरताः सर्वे व्यपोहन्तु मलं मम॥

खेचरी वसुचारी च ब्रह्मेशो ब्रह्म ब्रह्मधीः।
सुषेणः शाश्वतः पुष्टः सुपुष्टश्च महाबलः॥
एते वै चारणाः शम्भोः पूजयातीवभाविताः।
व्यपोहन्तु मलं सर्वं पापं चैव मया कृतम्॥

मन्त्रज्ञो मन्त्रवित्प्राज्ञो मन्त्रराड् सिद्धपूजितः।
सिद्धवत्परमः सिद्धः सर्वसिद्धिप्रदायिनः।
व्यपोहन्तु मलं सर्वे सिद्धाः शिवपदार्चकाः॥

यक्षो यक्षेश धनदो जृम्भको मणिभद्रकः।
पूर्णभद्रेश्वरो माली शितिकुण्डलिरेव च।
नरेन्द्रश्चैव यक्षेशो व्यपोहन्तु मलं मम॥

अनन्तः कुलिकश्चैव वासुकिस्तक्षकस्तथा।
कर्कोटको महापद्मः शङ्खपालो महाबलः॥
शिवप्रणामसंपन्नाः शिवदेहप्रभूषणाः।
मम पापं व्यपोहन्तु विषं स्थावरजङ्गमम्॥

वीणाज्ञः किन्नरश्चैव सुरसेनः प्रमर्दनः ।
अतीशयः सप्रयोगी गीतज्ञश्चैव किन्नराः ।
शिवप्रणामसंपन्नाः व्यपोहन्तु मलं मम ॥

विद्याधरश्च विबुधो विद्याराशिर्विदांवरः ।
विबुद्धो विबुधः श्रीमान् कृतज्ञश्च महायशाः ॥
एते विद्याधराः सर्वे शिवध्यानपरायणाः ।
व्यपोहन्तु मलं घोरं महादेवप्रसादतः ॥

वामदेवी महाजम्भः कालनेमिर्महाबलः ।
सुग्रीवो मर्दकश्चैव पिङ्गलो देवमर्दनः ॥
प्रह्लादश्चाप्यनुह्लादः संह्लादः किल बाष्कलौ ।
जम्भः कुम्भश्च मायावी कार्तवीर्यः कृतञ्जयः ॥
एतेऽसुरा महात्मानो महादेवपरायणाः ।
व्यपोहन्तु भयं घोरमासुरं भावमेव च ॥

गरुत्मान् खगतिश्चैव पक्षिराट् नागमर्दनः ।
नागशत्रुर्हिरण्याङ्गो वैनतेयः प्रभञ्जनः ॥
नागाशीर्विषनाशश्च विष्णुवाहन एव च ।
एते हिरण्यवर्णाभा गरुडा विष्णुवहनाः ।
नानाभरणसंपन्ना व्यपोहन्तु मलं मम ॥

अगस्त्यश्च वसिष्ठश्च अङ्गिरा भृगुरेव च ।
काश्यपो नारदश्चैव दधीचिश्च्यवनस्तथा ॥
उपमन्युस्तथान्ये च ऋषयः शिवभाविताः ।
शिवार्चनरताः सर्वे व्यपोहन्तु मलं मम ॥

पितरः पितामहाश्च तथैव प्रपितामहाः ।
अग्निष्वात्ता बर्हिषदस्तथा मातामहादयः ।
व्यपोहन्तु भयं पापं शिवध्यानपरायणाः ॥

लक्ष्मीश्च धरणी चैव गायत्री च सरस्वती ।
दुर्गा उषा शची ज्येष्ठा मातरः सुरपूजिताः ॥
देवानां मातरश्चैव गणानां मातरस्तथा ।
भूतानां मातरः सर्वा यत्र या गणमातरः ।
प्रसादाद्देवदेवस्य व्यपोहन्तु मलं मम ॥

उर्वशी मेनका चैव रम्भारतितिलोत्तमाः ।
सुमुखी दुर्मुखी चैव कामुकी कामवर्धिनी ॥
तथान्याः सर्वलोकेषु दिव्याश्चाप्सरसस्तथा ।
शिवाय ताण्डवं नित्यं कुर्वन्त्योऽतीव भाविताः ।
देव्यः शिवार्चनरता व्यपोहन्तु मलं मम ॥

अर्कः सोमोऽङ्गारकश्च बुधश्चैव बृहस्पतिः ।
शुक्रः शनैश्चरश्चैव राहुः केतुस्तथैव च ।
व्यपोहन्तु भयं घोरं ग्रहपीडां शिवार्चकाः ॥

मेषो वृषोऽथ मिथुनस्तथा कर्कटकस्तथा ।
सिंहश्च कन्या विपुला तुला वै वृश्चिकस्तथा ॥
धनुश्च मकरश्चैव कुम्भो मीनस्तथैव च ।
राशयो द्वादश ह्येते शिवपूजापरायणाः ।
व्यपोहन्तु भयं पापं प्रसादात्परमेष्ठिनः ॥

अश्विनी भरणी चैव कृत्तिका रोहिणी तथा ।
श्रीमन्मृगशिरश्चार्द्रा पुर्वसुर्पुष्यसार्पकाः ॥
मघा वै पूर्वपल्घुन्य उत्तराफाल्गुनी तथा ।
हस्तश्चित्रा तथा स्वाती विशाखा चानुराधिका ॥
ज्येष्ठा मूलं महाभागा पूर्वाषाढा तथैव च ।
उत्तराषाढिका चैव श्रवणं च श्रविष्ठिका ॥
शतभिषक् पूर्वभद्रा तथा प्रोष्ठपदा तथा ।
पौष्णं च देव्यः सततं व्यपोहन्तु मलं मम ॥

ज्वरः कुम्भोदरश्चैव शङ्कुकर्णो महाबलः ।
महाकर्णः प्रभातश्च महाभूतप्रमर्दनः ॥
श्येनजिच्छिवदूतश्च प्रमथाः प्रीतिवर्धनाः ।

कोटिकोटिशतैश्चैव भूतानां मातरः सदा।
व्यपोहन्तु भयं पापं महादेवप्रसादतः॥

शिवध्यानैकसम्पन्नो हिमराडम्बुसन्निभः।
कुन्देन्दुसदृशाकारः कुम्भकुन्देन्दुभूषणः॥
बडबानलशत्रुर्यो वडवामुखभेदनः।
चतुष्पादसमायुक्तः क्षीरोद इव पाण्डुरः॥
रुद्रलोके स्थितो नित्यं रुद्रैः सार्धं गणेश्वरैः।
वृषेन्द्रो विश्वधृग्देवो विश्वस्य जगतः पिता॥
वृतो नन्दादिभिर्नित्यं मातृभिर्मखमर्दनः।
शिवार्चनरतो नित्यं स मे पापं व्यपोहतु॥

गङ्गा माता जगन्माता रुद्रलोके व्यवस्थिता।
शिवभक्ता तु या नन्दा सा मे पापं व्यपोहतु॥

भद्रा भद्रपदा देवी शिवलोके व्यवस्थिता।
माता गवां महाभागा सा मे पापं व्यपोहतु॥

सुरभिः सर्वतोभद्रा सर्वपापप्रणाशिनी।
रुद्रपूजारता नित्यं सा मे पापं व्यपोहतु॥

सुशीला शीलसम्पन्ना श्रीप्रदा शिवभाविता।
शिवलोके स्थिता नित्यं सा मे पापं व्यपोहतु॥

वेदशास्त्रार्थतत्त्वज्ञः सर्वकार्याभिचिन्तकः ।
समस्तगुणसम्पन्नः सर्वदेवेश्वरात्मजः ॥
ज्येष्ठः सर्वेश्वरः सौम्यो महाविष्णुतनुः स्वयम् ।
आर्यः सेनापतिः साक्षाद्गहनो मखमर्दनः ।
ऐरावतगजारूढः कृष्णकुञ्चितमूर्धजः ॥
कृष्णाङ्गो रक्तनयनः शशिपन्नगभूषणः ।
भूतैः प्रेतैः पिशाचैश्च कूष्माण्डैश्च समावृतः ।
शिवार्चनरतः साक्षात् स मे पापं व्यपोहतु ॥

ब्रह्माणी चैव माहेशी कौमारी वैष्णवी तथा ।
वाराही चैव माहेन्द्री चामुण्डाग्नेयिका तथा ॥
एता वै मातरः सर्वा सर्वलोकप्रपूजिताः ।
योगिनीभिर्महापापं व्यपोहन्तु समाहिताः ॥

वीरभद्रो महातेजा हिमकुन्देन्दुसन्निभः ।
रुद्रस्य तनयो रौद्रः शूलासक्तमहाकरः ॥
सहस्रबाहुः सर्वज्ञः सर्वायुधधरः स्वयम् ।
त्रेताग्निनयनो देवस्त्रैलोक्याभयदः प्रभुः ॥
मातॄणां रक्षको नित्यं महावृषभवाहनः ।
त्रैलोक्यनमितः श्रीमान् शिवपादार्चने रतः ॥
यज्ञस्य च शिरच्छेत्ता पूष्णो दन्तविनाशनः ।
वह्नेर्हस्तहरः साक्षाद्भगनेत्रनिपातनः ॥

पादाङ्गुष्ठेन सोमाङ्गपेशकः प्रभुसंज्ञकः ।
उपेन्द्रेन्द्रयमादीनां देवानामङ्गरक्षकः ॥
सरस्वत्या महादेव्या नासिकोष्ठावकर्तनः ।
गणेश्वरो यः सेनानी स मे पापं व्यपोहतु ॥

ज्येष्ठा वरिष्ठा वरदा वराभरणभूषिता ।
महालक्ष्मीर्जगन्माता सा मे पापं व्यपोहतु ॥
महामोहा महाभागा महाभूतगणैर्वृता ।
शिवार्चनरता नित्यं सा मे पापं व्यपोहतु ॥
लक्ष्मीः सर्वगुणोपेता सर्वलक्षणसंयुता ।
सर्वदा सर्वगा देवी सा मे पापं व्यपोहतु ॥

सिंहारूढा महादेवी पार्वत्यास्तनयाव्यया ।
विष्णोर्निद्रा महामाया वैष्णवी सुरपूजिता ॥
त्रिनेत्रा वरदा देवी महिषासुरमर्दिनी ।
शिवार्चनरता दुर्गा सा मे पापं व्यपोहतु ॥

ब्रह्माण्डधारकाः रुद्राः सर्वलोकप्रपूजिताः ।
सत्याश्च मानसाः सर्वे व्यपोहन्तु भयं मम ॥

भूताः प्रेताः पिशाचाश्च कूष्माण्डगणनायकाः ।
कूश्माण्डकाश्च ते पापं व्यपोहन्तु समाहिताः ॥

फलश्रुतिः

अनेन देवं स्तुत्वा तु चान्ते सर्वं समापयेत् ।
प्रणम्य शिरसा भूमौ प्रतिमासे द्विजोत्तमाः ॥
व्यपोहनस्तवं दिव्यं यः पठेत् शृणुयादपि ।
विधूय सर्वपापानि रुद्रलोके महीयते ॥
कन्यार्थी लभते कन्यां जयकमो जयं लभेत् ।
अर्थकामो लभेदर्थं पुत्रकामो बहून् सुतान् ॥
विद्यार्थी लभते विद्यां भोगार्थी भोगमाप्नुयात् ।
यान् यान् प्रार्थयते कामन् मानवः श्रवणादिह ॥
तान् सर्वान् शीघ्रमाप्नोति देवानां च प्रियो भवेत् ।
पठ्यमनमिदं पुण्यं यमुद्दिश्य तु पठ्यते ॥
तस्य रोगा न बाधन्ते वातपित्तादिसम्भवाः ।
नाकाले मरणं तस्य न सर्पैरपि दश्यते ॥
यत्पुण्यं चैव तीर्थानां यज्ञानां चैव यत्फलम् ।
दानानां चैव यत्पुण्यं व्रतानां च विशेषतः ॥
तत्पुण्यं कोटिगुणितं जप्त्वा चाप्नोति मानवः ।
गोघ्नश्चैव कृतघ्नश्च वीरहा ब्रह्महा भवेत् ॥
शरणागतघाती च मित्रविश्वासघातकः ।
दुष्टः पापसमाचारो मातृहा पितृहा तथा ।
व्यपोह्य सर्वपापानि शिवलोके महीयते ॥

॥ इति लैङ्गे महापुराणे व्यपोहनस्तोत्रम् ॥

sūta uvāca
vyapohanastavaṃ vakṣye sarvasiddhipradaṃ śubham |
nandinaśca mukhāt śrutvā kumāreṇa mahātmanā |
vyāsāya kathitaṃ tasmāt bahumānena vai mayā ||

OM namaḥ śivāya namaḥ

OM namaḥ śivāya śuddhāya nirmalāya yaśasvine |
duṣṭāntakāya sarvāya (śarvāya) bhavāya paramātmane ||
pancavaktro daśabhujo hyakṣapancadaśairyutaḥ |
śuddhasphaṭikasaṅkāśaḥ sarvābharaṇabhūṣitaḥ ||
sarvajnaḥ sarvagaḥ śāntaḥ sarvopari susaṃsthitaḥ |
padmāsanasthaḥ someśaḥ pāpamāśu vyapohatu ||
īśānaḥ puruṣaścaiva aghoraḥ sadya eva ca |
vāmadevaśca bhagavān pāpamāśu vyapohatu ||

anantaḥ sarvavidyeśaḥ sarvajnaḥ sarvadaḥ prabhuḥ |
śivadhyānaikasaṃpannaḥ sa me pāpaṃ vyapohatu ||
sūkṣmaḥ surāsureśāno viśveśo gaṇapūjitaḥ |
śivadhyānaikasaṃpannaḥ sa me pāpaṃ vyapohatu ||
śivottamo mahāpūjyaḥ śivadhyānaparāyaṇaḥ |
sarvagaḥ sarvadaḥ śāntaḥ sa me pāpaṃ vyapohatu ||
ekākṣo bhagavānīśaḥ śivārcanaparāyaṇaḥ |
śivadhyānaikasaṃpannaḥ sa me pāpaṃ vyapohatu ||
trimūrtirbhagavānīśaḥ śivabhaktiprabodhakaḥ |

śivadhyānaikasaṃpannaḥ sa me pāpaṃ vyapohatu ||
śrīkaṇṭhaḥ śrīpatiḥ śrīmān śivadhyānarataḥ sadā |
śivārcanarataḥ sākṣāt sa me pāpaṃ vyapohatu ||
śikhaṇḍī bhagavān śāntaḥ śavabhasmānulepanaḥ |
śivārcanarataḥ śrīmān sa me pāpaṃ vyapohatu ||

trailokyanamitā devī solkākārā purātanī |
dākṣāyaṇī mahādevī gaurī haimavatī śubhā ||
ekaparṇāgrajā saumyā tathā vai caikapāṭalā |
aparṇā varadā devī varadānaikatatparā ||
umāsuraharā sākṣātkauśikī vā kapardinī |
khaṭvāṅgadhāriṇī divyā karāgratarupallavā ||
naigameyādibhirdivyaiścaturbhiḥ putrakairvṛtā |
menāyā nandinī devī vārijā vārijekṣaṇā ||
ambā yā vītaśokasya nandinaśca mahātmanaḥ |
śubhāvatyāḥ sakhī śāntā pancacūḍā varapradā ||
sṛṣṭyarthaṃ sarvabhūtānāṃ prakṛtitvaṃ gatāvyayā |
trayoviṃśatibhistattvairmahadādyairvijṛmbhitā ||
lakṣmyādi śaktibhirnityaṃ namitā nandanandinī |
manonmanī mahādevī māyāvī maṇḍanapriyā ||
māyayā yā jagatsarvaṃ brahmādyaṃ sacarācaram |
kṣobhiṇī mohinī nityaṃ yogināṃ hṛdi saṃsthitā ||
ekānekasthitā loke indīvaranibhekṣaṇā |
bhaktyā paramayā nityaṃ sarvadevairabhiṣṭutā ||
gaṇendrāmbhojagarbhendrayamavitteśapūrvakaiḥ |
saṃstutā jananī teṣāṃ sarvopadravanāśinī ||
bhaktānāmārtihā bhavyā bhavabhāvavināśinī |

bhuktimuktipradā divyā bhaktānāmaprayatnataḥ |
sā me sākṣānmahādevī pāpamāśu vyapohatu ||

caṇḍaḥ sarvagaṇeśāno mukhācchambhorvinirgataḥ |
śivārcanarataḥ śrīmān sa me pāpaṃ vyapohatu ||

śālaṅkāyanaputrastu halamārgotthitaḥ prabhuḥ |
jāmātā marutāṃ devaḥ sarvabhūtamaheśvaraḥ ||
sarvagaḥ sarvadṛk śarvaḥ sarveśasadṛśaḥ prabhuḥ |
sanārāyaṇakairdevaiḥ sendracandradivākaraiḥ |
siddhaiśca yakṣagandharvairbhūtairbhūtavidhāyakaiḥ ||
uragaiḥ ṛṣibhiścaiva brahmaṇā ca mahātmanā |
stutastrailokyanāthastu munirantaḥpuraṃ sthitaḥ |
sarvadā pūjitaḥ sarvairnandī pāpaṃ vyapohatu ||
mahākāyo mahātejā mahādeva ivāparaḥ |
śivārcanarataḥ śrīmān sa me pāpaṃ vyapohatu ||

merumandārakailāsataṭakūṭaprabhedanaḥ |
airāvatādibhirdivyairdiggajaiśca supūjitaḥ ||
saptapātālapādaśca saptadvīporujaṅghakaḥ |
saptārṇavāṅkuśaścaiva sarvatīrthodaraḥ śivaḥ ||
ākāśadeho digbāhuḥ somasūryāgnilocanaḥ |
hatāsuramahāvṛkṣo brahmavidyāmahotkaṭaḥ ||
brahmādyādhoraṇairdivyairyogapāśasamanvitaiḥ |
baddho hṛtpuṇḍarīkākhye stambhe vṛttiṃ nirudhya ca ||
nāgendravaktro yaḥ sākṣāt gaṇakoṭiśatairvṛtaḥ |
śivadhyānaikasaṃpannaḥ sa me pāpaṃ vyapohatu ||

bhṛṅgīśaḥ piṅgalākṣo.asau bhasitāśastu dehayuk |
śivārcanarataḥ śrīmān sa me pāpaṃ vyapohatu ||

caturbhistanubhirnityaṃ sarvāsuranibarhaṇaḥ |
skandaḥ śaktidharaḥ śāntaḥ senānī śikhivāhanaḥ |
devasenāpatiḥ śrīmān sa me pāpaṃ vyapohatu ||

bhavaḥ śarvastatheśāno rudraḥ paśupatistathā |
ugro bhīmo mahādevaḥ śivārcanaratāḥ sadā |
etāḥ pāpaṃ vyapohantu mūrtayaḥ parameṣṭhinaḥ ||

mahādevaḥ śivo rudraḥ śaṅkaro nīlalohitaḥ |
īśāno vijayo bhīmo devadevo bhavodbhavaḥ ||
kapālīśaśca vijneyo rudrā rudrāṃśasambhavāḥ |
śivapraṇāmasaṃpannā vyapohantu malaṃ mama ||

vikartano vivasvāṃśca mārtāṇḍo bhāskaro raviḥ |
lokaprakāśakaścaiva lokasākṣī trivikramaḥ ||
ādityaśca tathā sūryaścāṃśumāṃśca divākaraḥ |
ete vai dvādaśādityā vyapohantu malaṃ mama ||

gaganaṃ sparśanaṃ tejo rasaśca pṛthivī tathā |
candraḥ sūryastathātmā ca tanavaḥ śivabhāṣitāḥ ||
pāpaṃ mama vyapohantu bhayaṃ nirnāśayantu me ||

vāsavaḥ pāvakaścaiva yamo nirṛtireva ca |
varuṇo vāyusomau ca īśāno bhagavān hariḥ ||
pitāmahaśca bhagavān śivadhyānaparāyaṇaḥ |
ete pāpaṃ vyapohantu manasā karmaṇā kṛtam ||

nabhasvān sparśano vāyuranilo mārutastathā |
prāṇaḥ prāṇeśajīveśau mārutaśśivabhāṣitāḥ |
śivārcanaratāḥ sarve vyapohantu malaṃ mama ||

khecarī vasucārī ca brahmeśo brahma brahmadhīḥ |
suṣeṇaḥ śāśvataḥ puṣṭaḥ supuṣṭaśca mahābalaḥ ||
ete vai cāraṇāḥ śambhoḥ pūjayātīvabhāvitāḥ |
vyapohantu malaṃ sarvaṃ pāpaṃ caiva mayā kṛtam ||

mantrajno mantravitprājno mantrarāḍ siddhapūjitaḥ |
siddhavatparamaḥ siddhaḥ sarvasiddhipradāyinaḥ |
vyapohantu malaṃ sarve siddhāḥ śivapadārcakāḥ ||

yakṣo yakṣeśa dhanado jṛmbhako maṇibhadrakaḥ |
pūrṇabhadreśvaro mālī śitikuṇḍalireva ca |
narendraścaiva yakṣeśo vyapohantu malaṃ mama ||

anantaḥ kulikaścaiva vāsukistakṣakastathā |
karkoṭako mahāpadmaḥ śaṅkhapālo mahābalaḥ ||
śivapraṇāmasaṃpannāḥ śivadehaprabhūṣaṇāḥ |
mama pāpaṃ vyapohantu viṣaṃ sthāvarajaṅgamam ||

vīṇājnaḥ kinnaraścaiva surasenaḥ pramardanaḥ |
atīśayaḥ saprayogī gītajnaścaiva kinnarāḥ |
śivapraṇāmasaṃpannāḥ vyapohantu malaṃ mama ||

vidyādharaśca vibudho vidyārāśirvidāṃvaraḥ |
vibuddho vibudhaḥ śrīmān kṛtajnaśca mahāyaśāḥ ||
ete vidyādharāḥ sarve śivadhyānaparāyaṇāḥ |
vyapohantu malaṃ ghoraṃ mahādevaprasādataḥ ||

vāmadevī mahājambhaḥ kālanemirmahābalaḥ |
sugrīvo mardakaścaiva piṅgalo devamardanaḥ ||
prahlādaścāpyanuhlādaḥ saṃhlādaḥ kila bāṣkalau |
jambhaḥ kumbhaśca māyāvī kārtavīryaḥ kṛtanjayaḥ ||

ete.asurā mahātmāno mahādevaparāyaṇāḥ |
vyapohantu bhayaṃ ghoramāsuraṃ bhāvameva ca ||

garutmān khagatiścaiva pakṣirāṭ nāgamardanaḥ |
nāgaśatrurhiraṇyāṅgo vainateyaḥ prabhanjanaḥ ||
nāgāśīrviṣanāśaśca viṣṇuvāhana eva ca |
ete hiraṇyavarṇābhā garuḍā viṣṇuvahanāḥ |
nānābharaṇasaṃpannā vyapohantu malaṃ mama ||

agastyaśca vasiṣṭhaśca aṅgirā bhṛgureva ca |
kāśyapo nāradaścaiva dadhīciścyavanastathā ||
upamanyustathānye ca ṛṣayaḥ śivabhāvitāḥ |
śivārcanaratāḥ sarve vyapohantu malaṃ mama ||

pitaraḥ pitāmahāśca tathaiva prapitāmahāḥ |
agniṣvāttā barhiṣadastathā mātāmahādayaḥ |
vyapohantu bhayaṃ pāpaṃ śivadhyānaparāyaṇāḥ ||

lakṣmīśca dharaṇī caiva gāyatrī ca sarasvatī |
durgā uṣā śacī jyeṣṭhā mātaraḥ surapūjitāḥ ||
devānāṃ mātaraścaiva gaṇānāṃ mātarastathā |
bhūtānāṃ mātaraḥ sarvā yatra yā gaṇamātaraḥ |
prasādāddevadevasya vyapohantu malaṃ mama ||

urvaśī menakā caiva rambhāratitilottamāḥ |
sumukhī durmukhī caiva kāmukī kāmavardhinī ||
tathānyāḥ sarvalokeṣu divyāścāpsarasastathā |
śivāya tāṇḍavaṃ nityaṃ kurvantyo.atīva bhāvitāḥ |
devyaḥ śivārcanaratā vyapohantu malaṃ mama ||

arkaḥ somo.aṅgārakaśca budhaścaiva bṛhaspatiḥ |
śukraḥ śanaiścaraścaiva rāhuḥ ketustathaiva ca |
vyapohantu bhayaṃ ghoraṃ grahapīḍāṃ śivārcakāḥ ||

meṣo vṛṣo.atha mithunastathā karkaṭakastathā |
siṃhaśca kanyā vipulā tulā vai vṛścikastathā ||
dhanuśca makaraścaiva kumbho mīnastathaiva ca |
rāśayo dvādaśa hyete śivapūjāparāyaṇāḥ |
vyapohantu bhayaṃ pāpaṃ prasādātparameṣṭhinaḥ ||

aśvinī bharaṇī caiva kṛttikā rohiṇī tathā |
śrīmanmṛgaśiraścārdrā purvasurpuṣyasārpakāḥ ||
maghā vai pūrvapalghunya uttarāphālgunī tathā |
hastaścitrā tathā svātī viśākhā cānurādhikā ||
jyeṣṭhā mūlaṃ mahābhāgā pūrvāṣāḍhā tathaiva ca |
uttarāṣāḍhikā caiva śravaṇaṃ ca śraviṣṭhikā ||
śatabhiṣak pūrvabhadrā tathā proṣṭhapadā tathā |
pauṣṇaṃ ca devyaḥ satataṃ vyapohantu malaṃ mama ||

jvaraḥ kumbhodaraścaiva śaṅkukarṇo mahābalaḥ |
mahākarṇaḥ prabhātaśca mahābhūtapramardanaḥ ||
śyenajicchivadūtaśca pramathāḥ prītivardhanāḥ |
koṭikoṭiśataiścaiva bhūtānāṃ mātaraḥ sadā |
vyapohantu bhayaṃ pāpaṃ mahādevaprasādataḥ ||

śivadhyānaikasampanno himarāḍambusannibhaḥ |
kundendusadṛśākāraḥ kumbhakundendubhūṣaṇaḥ ||
baḍabānalaśatruryo vaḍavāmukhabhedanaḥ |
catuṣpādasamāyuktaḥ kṣīroda iva pāṇḍuraḥ ||
rudraloke sthito nityaṃ rudraiḥ sārdhaṃ gaṇeśvaraiḥ |

vṛṣendro viśvadhṛgdevo viśvasya jagataḥ pitā ||
vṛto nandādibhirnityaṃ mātṛbhirmakhamardanaḥ |
śivārcanarato nityaṃ sa me pāpaṃ vyapohatu ||

gaṅgā mātā jaganmātā rudraloke vyavasthitā |
śivabhaktā tu yā nandā sā me pāpaṃ vyapohatu ||

bhadrā bhadrapadā devī śivaloke vyavasthitā |
mātā gavāṃ mahābhāgā sā me pāpaṃ vyapohatu ||

surabhiḥ sarvatobhadrā sarvapāpapraṇāśinī |
rudrapūjāratā nityaṃ sā me pāpaṃ vyapohatu ||

suśīlā śīlasampannā śrīpradā śivabhāvitā |
śivaloke sthitā nityaṃ sā me pāpaṃ vyapohatu ||

vedaśāstrārthatattvajnaḥ sarvakāryābhicintakaḥ |
samastaguṇasampannaḥ sarvadeveśvarātmajaḥ ||
jyeṣṭhaḥ sarveśvaraḥ saumyo mahāviṣṇutanuḥ svayam |
āryaḥ senāpatiḥ sākṣādgahano makhamardanaḥ |
airāvatagajārūḍhaḥ kṛṣṇakuncitamūrdhajaḥ ||
kṛṣṇāṅgo raktanayanaḥ śaśipannagabhūṣaṇaḥ |
bhūtaiḥ pretaiḥ piśācaiśca kūṣmāṇḍaiśca samāvṛtaḥ |
śivārcanarataḥ sākṣāt sa me pāpaṃ vyapohatu ||

brahmāṇī caiva māheśī kaumārī vaiṣṇavī tathā |
vārāhī caiva māhendrī cāmuṇḍāgneyikā tathā ||
etā vai mātaraḥ sarvā sarvalokaprapūjitāḥ |
yoginībhirmahāpāpaṃ vyapohantu samāhitāḥ ||

vīrabhadro mahātejā himakundendusannibhaḥ |
rudrasya tanayo raudraḥ śūlāsaktamahākaraḥ ||
sahasrabāhuḥ sarvajnaḥ sarvāyudhadharaḥ svayam |
tretāgninayano devastrailokyābhayadaḥ prabhuḥ ||
mātṝṇāṃ rakṣako nityaṃ mahāvṛṣabhavāhanaḥ |
trailokyanamitaḥ śrīmān śivapādārcane rataḥ ||
yajnasya ca śiracchettā pūṣṇo dantavināśanaḥ |
vahnerhastaharaḥ sākṣādbhaganetranipātanaḥ ||
pādāṅguṣṭhena somāṅgapeśakaḥ prabhusaṃjnakaḥ |
upendrendrayamādīnāṃ devānāmaṅgarakṣakaḥ ||
sarasvatyā mahādevyā nāsikoṣṭhāvakartanaḥ |
gaṇeśvaro yaḥ senānī sa me pāpaṃ vyapohatu ||

jyeṣṭhā variṣṭhā varadā varābharaṇabhūṣitā |
mahālakṣmīrjaganmātā sā me pāpaṃ vyapohatu ||
mahāmohā mahābhāgā mahābhūtagaṇairvṛtā |
śivārcanaratā nityaṃ sā me pāpaṃ vyapohatu ||
lakṣmīḥ sarvaguṇopetā sarvalakṣaṇasaṃyutā |
sarvadā sarvagā devī sā me pāpaṃ vyapohatu ||

siṃhārūḍhā mahādevī pārvatyāstanayāvyayā |
viṣṇornidrā mahāmāyā vaiṣṇavī surapūjitā ||
trinetrā varadā devī mahiṣāsuramardinī |
śivārcanaratā durgā sā me pāpaṃ vyapohatu ||

brahmāṇḍadhārakāḥ rudrāḥ sarvalokaprapūjitāḥ |
satyāśca mānasāḥ sarve vyapohantu bhayaṃ mama ||

bhūtāḥ pretāḥ piśācāśca kūṣmāṇḍagaṇanāyakāḥ |
kūśmāṇḍakāśca te pāpaṃ vyapohantu samāhitāḥ ||

phalaśrutiḥ

anena devaṃ stutvā tu cānte sarvaṃ samāpayet |
praṇamya śirasā bhūmau pratimāse dvijottamāḥ ||
vyapohanastavaṃ divyaṃ yaḥ paṭhet śṛṇuyādapi |
vidhūya sarvapāpāni rudraloke mahīyate ||
kanyārthī labhate kanyāṃ jayakamo jayaṃ labhet |
arthakāmo labhedarthaṃ putrakāmo bahūn sutān ||
vidyārthī labhate vidyāṃ bhogārthī bhogamāpnuyāt |
yān yān prārthayate kāman mānavaḥ śravaṇādiha ||
tān sarvān śīghramāpnoti devānāṃ ca priyo bhavet |
paṭhyamanamidaṃ puṇyaṃ yamuddiśya tu paṭhyate ||
tasya rogā na bādhante vātapittādisambhavāḥ |
nākāle maraṇaṃ tasya na sarpairapi daśyate ||
yatpuṇyaṃ caiva tīrthānāṃ yajnānāṃ caiva yatphalam |
dānānāṃ caiva yatpuṇyaṃ vratānāṃ ca viśeṣataḥ ||
tatpuṇyaṃ koṭiguṇitaṃ japtvā cāpnoti mānavaḥ |
goghnaścaiva kṛtaghnaśca vīrahā brahmahā bhavet ||
śaraṇāgataghātī ca mitraviśvāsaghātakaḥ |
duṣṭaḥ pāpasamācāro mātṛhā pitṛhā tathā |
vyapohya sarvapāpāni śivaloke mahīyate ||

|| iti laiṅge mahāpurāṇe vyapohanastotram ||

www.kamakotimandali.com